# Shri Ramakrishna mangalashasanam

# श्रीरामकृष्णमङ्गलाशासनम्

## Document Information

Text title : Shri Ramakrishna mangalashasanam

File name : rAmakRRiShNamangalAshAsanam.itx

Category : deities_misc, gurudev, rAmakRiShNa, mangala

Location : doc_deities_misc

Author : Swami Achalananda Sarasvati

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीरामकृष्णमङ्गलाशासनम्

मङ्गलं देशिकेन्द्राय यमिनां चक्रवर्तिने ।
पराशक्तिस्वरूपिण्यै देव्यै भवतु मङ्गलम् ॥ १॥

सत्यसन्धस्य भक्तस्य क्षुदिरामस्य सूनवे ।
गदाधराय मेदिन्यामवतीर्णाय मङ्गलम् ॥ २॥

गदाधरसुनाम्ने च भक्त्यावेष्टितचेतसे ।
अनादृतान्यविद्याय मङ्गलं ब्रह्मचारिणे ॥ ३॥

भवतारणदक्षायाः सन्निधौ दक्षिणेश्वरे ।
अपूर्व कालिका पूजा निरतायास्तु मङ्गलम् ॥ ४॥

मथुरानाथविश्वास सेवानिर्वृतचेतसे ।
तपश्चरणशीलाय योगीशायास्तु मङ्गलम् ॥ ५॥

साधकव्याजसन्दिष्ट सर्वाम्नाय सुवर्त्मने ।
सर्वतन्त्रस्वतन्त्राय नित्यसिद्धाय मङ्गलम् ॥ ६॥

तपसि ब्रह्मचर्ये च या स्वस्य सहधर्मिणी ।
तस्याः श्री शारदादेव्या भर्त्रे भवतु मङ्गलम् ॥ ७॥

तोतापुरीयती प्राप्त चरमाश्रमहेतुके ।
समाधौ निर्विकल्पाख्ये सुदीर्घस्थाय मङ्गलम् ॥ ८॥

स्थिताय मातुरादेशात् जगदुद्धारकारणात् ।
पूर्णाऽन्तस्थितौ भावमुखे भवतु मङ्गलम् ॥ ९॥

पश्यते मातरं स्त्रीषु मृत्पिण्डं काञ्चनं तथा ।
सर्वभूतेषु च ब्रह्म मायातीताय मङ्गलम् ॥ १०॥

सदारोऽपि विरक्तानां यतीनां पुरतस्तु यः ।
सदाशिवस्वरूपाय तस्मै भवतु मङ्गलम् ॥ ११॥

ब्रह्मानन्दादिसच्छिष्य गणपूज्यपदाय ते ।
तेषु दीप्तात्मबोधाय परमहंसाय मङ्गलम् ॥ १२॥

गर्जद्वेदान्तसिंहेन विवेकानन्दरूपिणा ।
अपास्तनिद्रा भूर्येण कारिताऽस्मै च मङ्गलम् ॥ १३॥

संसारसागरोत्तार सेतु भूताङ्घ्रि रेणवे ।
गुरवे सर्वलोकानां रामकृष्णाय मङ्गलम् ॥ १४॥

“ॐ स्थापकाय च धर्मस्य सर्वधर्मस्वरूपिणे ।
अवतारवरिष्ठाय” रामकृष्णाय मङ्गलम् ॥ १५॥

मङ्गलं गुरुदेवाय देव्यै मात्रे च मङ्गलम् ।
मङ्गलं भक्तवृन्देभ्यः सर्वलोकाय मङ्गलम् ॥ १६॥

इति स्वामिअचलानन्दसरस्वतीविरचितं
“श्रीरामकृष्णमङ्गलाशासनम्” सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Ramakrishna mangalashasanam*
pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*